# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**– आचार्यद्वितीयवर्षम् (SEM-3) | **प्रश्नपत्रम् – ३** (New) | **गुणाः** – ७० |
| **विषयः** – नव्यव्याकरणम् | **कोड- CC - 5.3.8** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०६/१२/२०१८ | **सन्दर्भग्रन्थः**– परमलघुमञ्जूषा | |

**॥ प्रथमान्वितिः ॥**

**प्र–१** धात्वर्थफलव्यापारयोः निरूपणं स्वाधीतग्रन्थदिशा कर्तव्यम्। **०५**

अथवा

फलव्यापारयोः धातोः पृथक् शक्तिस्वीकारे के के दोषाः सन्ति इति उपस्थाप्यन् धात्वर्थविषयकं मञ्जूषाकारमतम् उपस्थापनीयम्।

**प्र–२** धात्वर्थविषयकं मीमांसकमतं समुपस्थाप्य तत्खण्डनं यथाग्रन्थं विधातव्यम्। **१०**

अथवा

क्रियास्वरूपविचारं स्वपाठ्यपुस्तकानुसारं कुरुत।

**॥ द्वितीयान्वितिः ॥**

**प्र–३** निपातानां द्योतकत्वं सोदाहरणं प्रतिपादनीयम्। **०५**

अथवा

द्योतकत्वं नाम किम् ? सोदाहरणं विवेचनीयम्।

**प्र–४** निपातविषयकं नैयायिकमतं प्रदर्श्य तत्खण्डनं प्रदर्शनीयम्। **१०**

अथवा

निपातविषयकं भूषणकारादिमतं प्रदर्श्य तत्खण्डनं यथाग्रन्थं प्रदर्शनीयम्।

**॥ तृतीयान्वितिः ॥**

**प्र–५** लकाराणाम् अर्थनिरूपणविषयकं तार्किकमतं प्रदर्श्य वैयाकरणमतम् उपस्थापनीयम्। **०५**

अथवा

कृभ्वाद्यनुप्रयोगस्थलीयं विवरणं स्वशब्दैः प्रस्तोतव्यम्।

**प्र–६** लकाराणाम् अर्थान् प्रदर्श्य तेषाम् अन्वयप्रकारः ग्रन्थानुसारं लेखनीयः। **१०**

अथवा

लकारार्थविषयकं नैयायिकमतं सोदाहरणं स्वाधीतग्रन्थदिशा उपस्थापनीयम्।

## ॥ चतुर्थान्वितिः ॥

**प्र-७** सम्बोधनविभक्तेः कारकत्वं समुत्पादनीयम्। **०५**

अथवा

करणकारकविचारः ग्रन्थानुसारं प्रतिपादनीयः।

**प्र-८** कारकपरिभाषां षट् कारकाणि च प्रदर्श्य कर्तृत्वविचारः यथाग्रन्थम् उपस्थापनीयः। **१०**

अथवा

कर्मकारकत्वं स्वशब्दैः प्रस्तोतव्यम्।

**प्र-९** **निम्नलिखितेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं लेख्यम्।** **१०**

१. **फलानुकूलो यत्नसहितो व्यापारः** कस्य लक्षणम्।
२. अनुकूलत्वं किं भवति ?
३. धात्वर्थस्य कालस्य कुत्र अन्वयो भवति ?
४. धात्वर्थसंख्यायाः कुत्र अन्वयो भवति ?
५. केषां मते निपाताः द्योतकाः ?
६. केषां मते निपाताः वाचकाः ?
७. *भविष्ये सम्पत्स्यमानं कारकसम्बन्धम् आश्रित्य कस्य धातुसंज्ञा भवति ?*
८. *नञ् कतिविधो भवति ?*
९. *प्रारब्धापरसमाप्तक्रियोपलक्षितत्वं नाम किम् ?*
१०. *परोक्षत्वं कुत्र विशेषणं भवति ?*
११. *अनद्यतनभविष्ये को लकारो भवति ?*
१२. *सामान्यभूते को लकारो भवति ?*
१३. *उक्ते कारके का विभक्तिः ?*
१४. *अनुक्ते कर्तरि का विभक्तिः ?*
१५. *अनुक्ते सम्प्रदाने का विभक्तिः ?*